# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
# सत्रान्तपरीक्षा – दिसम्बर, २०१८

| | | |
|---|---|---|
| **कक्षा –** आचार्यः -२ (SEM-3) | **प्रश्नपत्रम् -४**<br>(CC 5.3.9)<br>NEW & OLD | **गुणाः –** ७० |
| **विषयः-** नव्यन्यायः | | **ग्रन्थः-** शक्तिवादः (सा.का. वि. काण्डे द्रव्यानुपपत्तिश्चिन्त्या इति पर्यन्तम्) |
| **दिनाङ्कः –** ०७/१२/२०१८ | | **समयः –** १० तः १ |

## विभागः १

**प्रश्नः १ निम्नलिखितयोः द्वयोरेकस्य समाधानं सप्रसङ्गं लिखत।** ०५

१ शक्तिलक्षणे पदवृत्तीः व्याख्यात।

२ यत्तु इत्युक्तं सम्बन्धान्तरं शक्तिरिति पक्षं निरूप्य निरस्यत।

**प्रश्नः २ निम्नलिखितयोः द्वयोरेकस्य निबन्धात्मिका व्याख्या कार्या।** १०

१ ईश्वरसङ्केतस्य शक्तित्वे अनुपपत्तीः परिहरत।

२ सङ्केतार्थबोधं प्रतिपादयत।

## विभागः २

**प्रश्नः ३ निम्नलिखितयोः द्वयोरेकस्य उत्तरं सन्दर्भसहितं देयम्।** ०५

१ लाक्षणिकस्थले ईश्वरेच्छाकल्पने अनुपपत्तिं गदाधरमतानुसारं निरूपयत।

२ कार्यान्वितस्वार्थे पदानां शक्तिरितिपक्षमुपस्थापयत।

**प्रश्नः ४ निम्नलिखितयोः एकस्य प्रश्नस्य निबन्धात्मकमुत्तरं लिखत।** १०

१ ज्ञाने पदानां शक्तिरितिमीमांसकमतमुपस्थाप्य निरस्यत।

२ संसर्गे शक्तिरिति अन्विताभिधानवादं समर्थयत।

## विभागः ३

**प्रश्नः ५ निम्नलिखितयोः द्वयोरेकस्य सन्दर्भव्याख्या देया।** ०५

१ शक्तिविषयकदीधितिकारमतं प्रदर्शयत।

२ पदार्थः पदार्थेनान्वेति इति न्यायवाक्यस्यार्थं प्रतिपादयत।

**प्रश्नः ६ निम्नलिखितयोः एकस्य प्रश्नस्य निबन्धात्मकमुत्तरं लिखत।** **१०**

१ त्रयाणां वाच्यत्वोपपत्तिं प्रतिपादयत।

२ शक्तिग्रहशाब्दबोधयोः कार्यकारणभावे आक्षेपान् प्रदर्श्य वारयत।

## विभागः ४

**प्रश्नः ७ निम्नलिखितयोः एकस्य उत्तरं सन्दर्भसहितं देयम्।** **०५**

१ वस्तुतस्तु इति कथितं आकाशपदस्य शक्तिविचारं निरूपयत।

२ आकाशशब्दात् शब्दाश्रयत्वप्रकारकः शाब्दबोधः कथमिति व्याख्यात।

**प्रश्नः ८ निम्नलिखितयोः एकस्य प्रश्नस्य निबन्धात्मकमुत्तरं लिखत।** **१०**

१ आकाशपदशक्तिं निरूपयत।

२ आकाशशक्तिनिरूपणपरप्राचीनमतस्य साधुत्वं नास्तीति प्रतिपादयत।

**प्रश्नः ९ निम्नलिखितप्रश्नेषु दशप्रश्नानामुत्तराणि एकवाक्येन यच्छन्तु।** **१०**

१ पारिभाषिकमित्यस्यार्थः कः ?
२ पदवृत्ती के ?
३ पारिभाषिकपदस्योदाहरणं किम् ?
४ सङ्केतः कुतः न सम्बन्ध इति पूर्वपक्षः?
५ के अन्विताभिधानवादिनः ?
६ असंसर्गाऽग्रहः कः ?
७ कार्यान्वितस्वार्थे पदानां शक्तिरिति केषां मतम् ?
८ गङ्गायां घोषः इत्यत्र कथं शाब्दबोधः ?
९ पदार्थसंसर्गस्यापि वाच्यतां के स्वीकुर्वन्ति ?
१० घटपदात् कः बोद्धव्यः ?
११ घटादिपदानां कुत्र शक्तिः ?
१२ ‘पदादपि निर्विकल्पकबोधः’ इति केषां मतम् ?
१३ आकाशपदं किं बोधकम् ?
१४ पदार्थः केन नान्वेति ?
१५ दीधितिकारः कः ?

-----xxxxx-----